# 10

# अमरकोश–स्वर्गवर्ग

संस्कृत भाषा के जिज्ञासु लोगों के लिए अमरकोश एक प्रसिद्ध ग्रंथ है। अमरकोश का मूल नाम है–लिडानुशासनम्। अमरकोश संस्कृत का शब्दकोश है। इसके लेखत भारतीय मनिषि अमर सिंह है। यह माना जाता है कि यह सर्वाधिक पुराना कोश है जो वर्तमान में चलन में है। अमर सिंह के 18 अन्य कोशों का उल्लेख किया है परंतु वे अब उपलब्ध नहीं हैं। अमरकोश पर बाद के समय में लगभग 40 टीकायें लिखी जा चुकी हैं। इसके तीन भाग हैं। प्रत्येक भाग में अनेक अध्याय है। प्रथम भाग का प्रथम अध्याय, स्वर वर्ग कहलाता है। इस पाठ में आप स्वर वर्ग का अध्ययन करेंगे।

## उद्देश्य

यह पाठ पढ़ने के बाद आप सक्षम होंगे–

- स्वर वर्ग के सभी श्लोकों का उच्चारण कर पाने में; और
- स्वर वर्ग में प्रयुक्त शब्दों के पर्यायवाची बता पाने में।

## 10.1 अमरकोश-स्वरवर्ग (खण्ड-1)

प्रथमं काण्डम्। मङ्गलाचरणम्।

(१.०.१) यस्य ज्ञानदयासिंधोरगाधस्यानघा गुणाः।

(१.०.२) सेव्यतामक्षयो धीराः स श्रिये चामृताय च। मङ्गलाचरणम्।

प्रस्तावना।

(१.०.३) समाहृत्यान्यतन्त्राणि संक्षिप्तैः प्रतिसंस्कृतैः चिकीर्षतप्रतिज्ञा।

(१.०.४) संपूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्

### अमरकोश पढ़ने के नियम

परिभाषा।

(१.०.५) प्रायशो रूपभेदेन साहचर्याच्च कुत्रचित्

(१.०.६) स्त्रीपुंनपुंसकं ज्ञेयं तद्विशेषविधेः क्वचित्

(१.०.७) भेदाख्यानाय न द्वन्द्वो नैकशेषो न संकरः

(१.०.८) कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमा.ते

(१.०.९) त्रिलिङ्ग्यां त्रिष्विति पदं मिथुने तु द्वयोरिति

(१.०.१०) निषिद्धलिङ्गं शेषार्थं त्वन्ताथादि न पूर्वभाक्

### स्वर्ग 9

(१.१.११) स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालयाः

(१.१.१८) सुरलोको द्योदिवौ द्वे स्त्रियां क्लीबे त्रिविष्टपम्

## देवता 26

(१.१.१३) अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः

(१.१.१४) सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः

(१.१.१५) आदितेया दिविषदो लेखा अदितिनन्दनाः

(१.१.१६) आदित्या ऋभवोऽस्वप्ना अमर्त्या अमृतान्धसः

(१.१.१७) बर्हिर्मुखाः ऋतुभुजो गीर्वाणा दानवारयः

(१.१.१८) वृन्दारका दैवतानि पुंसि वा देवताः स्त्रियाम्

## देवताओं के कुछ वंश

(१.१.१९) आदित्यविश्ववसवस्तुषिताभास्वरानिलाः

(१.१.२०) महाराजिकसाध्याश्च रुद्राश्च गणदेवताः

## कुछ गन्धर्व

(१.१.२१) विद्याधराप्सरोयक्षरक्षोगन्धर्वकिंनराः

(१.१.२२) पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः

## असुर अथवा शक्तियां 10

(१.१.२३) असुरा दैत्यदैतेयदनुजेन्द्रारिदानवाः

(१.१.२४) शुक्रशिष्या दितिसुताः पूर्वदेवाः सुरद्विषः

### जैन अथवा बुद्ध 18

(१.१.२५) सर्वज्ञः सुगतः बुद्धो धर्मराजस्तथागतः

(१.१.२६) समन्तभद्रो भगवान्मारजिल्लोकजिज्जिनः

(१.१.२७) षडभिज्ञो दशबलोऽद्वयवादी विनायकः

(१.१.२८) मुनीन्द्रः श्रीघनः शास्ता मुनिः शाक्यमुनिस्तु यः

### गौतम बुद्ध 7

(१.१.२६) स शाक्यसिंहः सर्वार्थसिद्धः शौद्धोदनिश्च सः

(१.१.३०) गौतमश्चार्कबन्धुश्च मायादेवीसुतश्च सः

### ब्रह्मा 29

(१.१.३१) ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः

(१.१.३२) हिरण्यगर्भो लोकेशः स्वयंभूश्चतुराननः

(१.१.३३) धाताब्जयोनिर्द्रुहिणो विरिञ्चिः कमलासनः

(१.१.३४) स्रष्टा प्रजापतिर्वेधा विधाता विश्वसृग्विधिः

(१.१.३५) नाभिजन्माण्डजः पूर्वो निधनः कमलोद्भवः

(१.१.३६) सदानन्दो रजोमूर्तिः सत्यको हंसवाहनः

### विष्णु 46

(१.१.३७) विष्णुर्नारायणः कृष्णो वैकुण्ठो विष्टरश्रवाः

(१.१.३८) दामोदरो हृषीकेशः केशवो माधवः स्वभूः

(१.१.३६) दैत्यारिः पुण्डरीकाक्षो गोविन्दो गरुडध्वजः

(१.१.४०) पीताम्बरोऽच्युतः शाङ्र्गी विष्वक्सेनो जनार्दनः

(१.१.४१) उपेन्द्र इन्द्रावरजश्चक्रपाणिश्चतुर्भुजः

(१.१.४२) पद्मनाभो मधुरिपुर्वासुदेवस्त्रिविक्रमः

(१.१.४३) देवकीनन्दनः शौरिः श्रीपतिः पुरुषोत्तमः

(१.१.४४) वनमाली बलिध्वंसी कंसारातिरधोक्षजः

(१.१.४५) विश्वम्भरः कैटभजिद्विधुः श्रीवत्सलाञ्छनः

(१.१.४६) पुराणपुरुषो यज्ञपुरुषो नरकान्तकः

(१.१.४७) जलशायी विश्वरूपो मुकुन्दो मुरमर्दनः

**वासुदेव : कृष्ण के पिता 2**

(१.१.४८) वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः

**बलराम 17**

(१.१.४९) बलभद्रः प्रलम्बघ्नो बलदेवोऽच्युताग्रजः

(१.१.५०) रेवतीरमणो रामः कामपालो हलायुधः

(१.१.५१) नीलाम्बरो रौहिणेयस्तालाङ्को मुसली हली

(१.१.५२) संकर्षणः सीरपाणिः कालिन्दीभेदनो बलः

**कामदेव : आकर्षण के देवता 19**

(१.१.५३) मदनो मन्मथो मारः प्रद्युम्नो मीनकेतनः

(१.१.५४) कंदर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः

(१.१.५५) शम्बरारिर्मनसिजः कुसुमेषुरनन्यजः

(१.१.५६) पुष्पधन्वा रतिपतिर्मकरध्वज आत्मभूः

## कामदेव के पाँच पुण्यबाण

(१.१.५७) अरविन्दमशोकं च चूतं च नवमल्लिका

(१.१.५८) नीलोत्पलं च पञ्चैते पञ्चबाणस्य सायकाः

## कामदेव के पाँच भौतिक बाण

(१.१.५९) उन्मादनस्तापनश्च शोषणः स्तम्भनस्तथा

(१.१.६०) संमोहनश्च कामश्च पञ्च बाणाः प्रकीर्तिताः

## कामदेव का पुत्र 4

(१.१.६१) ब्रह्मसूर्विश्वकेतुः स्यादनिरुद्ध उषापतिः

## लक्ष्मी 14

(१.१.६२) लक्ष्मीः पद्मालया पद्मा कमला श्रीर्हरिप्रिया

(१.१.६३) इन्दिरा लोकमाता मा क्षीरोदतनया रमा

(१.१.६४) भार्गवी लोकजननी क्षीरसागरकन्यका

## कृष्ण के उपकरण : जलज, चक्र, जानिवी (राजदण्ड), तलवार, मणि

(१.१.६५) शङ्खो लक्ष्मीपतेः पाञ्चजन्यश्चक्रं सुदर्शनः

(१.१.६६) कौमोदकी गदा खड्गो नन्दकः कौस्तुभो मणिः

### कृष्ण का धनुष, छाप, घोडे 4

(१.१.६७) चापः शाङ्‍र्गं मुरारेस्तु श्रीवत्सो लाञ्छनं स्मृतम्

(१.१.६८) अश्वाश्च शैब्यसुग्रीवमेघपुष्पबलाहकाः

### कृष्ण के दरबारी, मंत्री, अनुज भाई

(१.१.६९) सारथिर्दारुको मन्त्री ह्युद्धवश्चानुजो गदः

### गरुड : कृष्ण का मान 9

(१.१.७०) गरुत्मान्गारुडस्ताक्ष्यो वैनतेयः खगेश्वरः

(१.१.७१) नागान्तको विष्णुरथः सुपर्णः पन्नगाशनः

### शिव 52

(१.१.७२) शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः

(१.१.७३) ईश्वरः शर्व ईशानः शंकरश्चन्द्रशेखरः

(१.१.७४) भूतेशः खण्डपरशुर्गिरीशो गिरिशो मृडः

(१.१.७५) मृत्युञ्जयः .त्तिवासाः पिनाकी प्रमथाधिपः

(१.१.७६) उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्

(१.१.७७) वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः

(१.१.७८) कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः

(१.१.७९) हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः

(१.१.८०) गङ्‍गाधरोऽन्धकरिपुः क्रतुध्वंसी वृषध्वजः

(१.१.८१) व्योमकेशो भवो भीमः स्थाणू रुद्र उमापतिः

(१.१.८२) अहिर्बुध्न्योऽष्टमूर्तिश्च गजारिश्च महानटः

### शिव की जटा, कमान, सेवक, दैविय माताएं

(१.१.८३) कपर्दोऽस्य जटाजूटः पिनाकोऽजगवं धनुः

(१.१.८४) प्रमथाः स्युः पारिषदा ब्राह्मीत्याद्यास्तु मातरः

### शिव की शक्तियां/महिमा 3

(१.१.८५) विभूतिर्भूतिरैश्वर्यमणिमादिकमष्टधा

### शिव प्रदत्त आठ यौगिक उपलब्धियां

(१.१.८६) अणिमा महिमा चैव गरिमा लघिमा तथा

(१.१.८७) प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्ट सिद्धयः

### शिव की पत्नि पार्वती 23

(१.१.८८) उमा कात्यायनी गौरी काली हैमवतीश्वरी

(१.१.८९) शिवा भवानी रुद्राणी शर्वाणी सर्वमङ्गला

(१.१.९०) अपर्णा पार्वती दुर्गा मृडानी चण्डिकाम्बिका

(१.१.९१) आर्या दाक्षायणी चैव गिरिजा मेनकात्मजा

(१.१.९२) कर्ममोटी तु चामुण्डा चर्ममुण्डा तु चर्चिका

**शिव के पुत्र गणपति 8**

(१.१.६३) विनायको विघ्नराजद्वैमातुरगणाधिपाः

(१.१.६४) अप्येकदन्तहेरम्बलम्बोदरगजाननाः

**शिव के पुत्र कार्तिकेय 17**

(१.१.६५) कार्तिकेयो महासेनः शरजन्मा षडाननः

(१.१.६६) पार्वतीनन्दनः स्कन्दः सेनानीरग्निभूर्गुहः नानीरग्निभूर्गुहः

(१.१.६७) बाहुलेयस्तारकजिद्विशाखः शिखिवाहनः

(१.१.६८) षाण्मातुरः शक्तिधरः कुमारः क्रौञ्चदारणः

**शिव का यान - नंदी बैल 6**

(१.१.६६) शृङ्गी भृङ्गी रिटिस्तुण्डी नन्दिको नन्दिकेश्वरः

**इन्द्र 35**

(१.१.१००) इन्द्रो मरुत्वान्मघवा बिडौजाः पाकशासनः

(१.१.१०१) वृद्धश्रवाः सुनासीरः पुरुहूतः पुरन्दरः

(१.१.१०२) जिष्णुर्लेखर्षभः शक्रः शतमन्युर्दिवस्पतिः

(१.१.१०३) सुत्रामा गोत्रभिद्वज्री वासवो वृत्रहा वृषा

(१.१.१०४) वास्तोष्पतिः सुरपतिर्बलारातिः शचीपतिः

(१.१.१०५) जम्भभेदी हरिहयः स्वाराण्नमुचिसूदनः

(१.१.१०६) संक्रन्दनो दुश्च्यवनस्तुराषाण्मेघवाहनः

(१.१.१०७) आखण्डलः सहस्राक्ष ऋभुक्षास्तस्य तु प्रिया

**इन्द्र की पत्नि साची 3, नगर 1**

(१.१.१०८) पुलोमजा शचीन्द्राणी नगरी त्वमरावती

**इन्द्र के घोडे, दरबारी, पुत्र, बाग, महल, पुत्र (2)**

(१.१.१०९) हय उच्चैःश्रवा सूतो मातलिर्नन्दनं वनम्

(१.१.११०) स्यात्प्रासादो वैजयन्तो जयन्तः पाकशासनिः

**इन्द्र का यान : हाथी (4), वज्र (10),**

(१.१.१११) ऐरावतोऽभ्रमातङ्गैरावणाऽभ्रमुवल्लभाः

(१.१.११२) ह्लादिनी वज्रमस्त्री स्यात् कुलिशं भिदुरं पविः

(१.१.११३) शतकोटिः स्वरुः शम्बो दम्भोलिरशनिर्द्वयोः

**वायुयान (2), साधु, समा (1), अमृत (3)**

(१.१.११४) व्योमयानं विमानोऽस्त्री नारदाद्याः सुरर्षयः

(१.१.११५) स्यात सुधर्मा देवसभा पीयूषममृतं सुधा

**दैविय नदी : आकाश गंगा (4), स्वर्गमय मेरु पर्वतमाला (5)**

(१.१.११६) मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिका

(१.१.११७) मेरुः सुमेरुर्हेमाद्री रत्नसानुः सुरालयः

**पाँच दैविय वृक्ष**

(१.१.११८) पञ्चैते देवतरवो मन्दारः पारिजातकः

(१.१.११९) सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्

## सनतकुमार (2), दैविय वैद्य : अश्विन (6), अप्सरा (2)

(१.१.१२०) सनत्कुमारो वैधात्रः स्वर्वैद्यावश्विनीसुतौ

(१.१.१२१) नासत्यावश्विनौ दस्रावाश्विनेयौ च तावुभौ

(१.१.१२२) स्त्रियां बहुष्वप्सरसः स्वर्वेश्या उर्वशीमुखाः

## दैविय संगीतकार (2), आग (34), जहाजी आग (3)

(१.१.१२३) हाहा हूहूश्चैवमाद्या गन्धर्वास्त्रिदिवौकसाम्

(१.१.१२४) अग्निर्वैश्वानरो वह्निर्वीतिहोत्रो धनञ्जयः

(१.१.१२५) कृपीटयोनिर्ज्वलनो जातवेदास्तनूनपात्

(१.१.१२६) बर्हिः शुष्मा कृष्णवर्त्मा शोचिष्केश उषर्बुधः

(१.१.१२७) आश्रयाशो बृहद्भानुः दृशानुः पावकोऽनलः

(१.१.१२८) रोहिताश्वो वायुसखः शिखावानाशुशुक्षणिः

(१.१.१२९) हिरण्यरेता हुतभुग् दहनो हव्यवाहनः

(१.१.१३०) सप्तार्चिर्दमुनाः शुक्रश्चित्रभानुर्विभावसुः

(१.१.१३१) शुचिरप्पित्तमौर्वस्तु वाडवो वडवानलः

## अग्नि (5), किरण (चमक) (2), जलन (2)

(१.१.१३२) वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिः शिखा स्त्रियाम्

(१.१.१३३) त्रिषु स्फुलिङ्गोऽग्निकणः संतापः संज्वरः समौ

### उल्का (1), शंख (5), जंगल की आग (3)

(१.१.१३४) उल्का स्यान् निर्गतज्वाला भूतिर्भसितभस्मनी

(१.१.१३५) क्षारो रक्षा च दावस्तु दवो वनहुताशनः

### यम : मृत्यु के देवता (14)

(१.१.१३६) धर्मराजः पितृपतिः समवर्ती परेतराट्

(१.१.१३७) दृतान्तो यमुनाभ्राता शमनो यमराड् यमः

(१.१.१३८) कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः

(१.१.१३९) राक्षसः कोणपः क्रव्यात् क्रव्यादोऽस्रप आशरः

### दैत्य, राक्षस (15)

(१.१.१४०) रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मजः

(१.१.१४१) यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी

### वरुण : सागर के देवता (5)

(१.१.१४२) प्रचेता वरुणः पाशी यादसांपतिरप्पतिः

### वायु : समीर के देवता (20)

(१.१.१४३) श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः

(१.१.१४४) पृषदश्वो गन्धवहो गन्धवाहाऽनिलाऽऽशुगाः

(१.१.१४५) समीरमारुतमरुज्जगत्प्राणसमीरणाः

(१.१.१४६) नभस्वद्वातपवनपवमानप्रभञ्जनाः



**चक्रवात, तूफान**

(१.१.१४७) प्रकम्पनो महावातो झञ्झावातः सवृष्टिकः

**आयुर्वेद सम्मत पाँच शारीरिक वायु, गति (5)**

(१.१.१४८) प्राणोऽपानः समानश्चोदानव्यानौ च वायवः

(१.१.१४९) शरीरस्था इमे रंहस्तरसी तु रयः स्यदः

(१.१.१५०) जवोऽथ शीघ्रं त्वरितं लघु क्षिप्रमरं द्रुतम्

**शीघ्रता (11)**

(१.१.१५१) सत्वरं चपलं तूर्णमविलम्बितमाशु च

**अविनाशी (9), अधिक (14)**

(१.१.१५२) सततेऽनारताऽश्रान्तसंतताविरतानिशम्

(१.१.१५३) नित्याऽनवरताऽजस्रमप्यथाऽतिशयो भरः

(१.१.१५४) अतिवेलभृशाऽत्यर्थाऽतिमात्रोद्गाढनिर्भरम्

(१.१.१५५) तीव्रैकान्तनितान्तानि गाढबाढ.ढानि च

(१.१.१५६) क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां सत्त्वगामि यत्

**कुबेर : धन के देवता (19)**

(१.१.१५७) कुबेरस्त्र्यम्बकसखो यक्षराड् गुह्यकेश्वरः

(१.१.१५८) मनुष्यधर्मा धनदो राजराजो धनाधिपः

(१.१.१५९) किन्नरेशो वैश्रवणः पौलस्त्यो नरवाहनः

(१.१.१६०) यक्षैकपिङ्गैलविलश्रीदपुण्यजनेश्वराः

**कुबेर का बगीचा, पुत्र, महल, नगर, सेवक (4)**

(१.१.१६१) अस्योद्यानं चैत्ररथं पुत्रस्तु नलकूबरः

(१.१.१६१) कैलासः स्थानमलका पूर्विमानं तु पुष्पकम्

(१.१.१६३) स्यात् किन्नरः किम्पुरुषस्तुरङ्गवदनो मयुः

**खजाना (2), नौ प्रकार के खजाने**

(१.१.१६४) निधिर्नाशेवधिर्भेदाः पद्मशङ्खाऽऽदयो निधेः

(१.१.१६५) महापद्मश्च पद्मश्च शङ्खो मकरकच्छपौ

(१.१.१६६) मुकुन्दकुन्दनीलाश्च खर्वश्च निधयो नव

## पाठगत प्रश्न 10.1

1. अमरकोश क्या है?
2. पाँच प्राण क्या-क्या हैं?
3. स्वर्ग के पाँच पर्यायवाची लिखिए।
4. देवता के 10 पर्यायवाची लिखिए।
5. ब्रह्मा के 5 पर्यायवाची लिखिए।

## आपने क्या सीखा

- अमरकोश संस्कृत का शब्दकोश है।
- इसके लेखक अमरसिंह हैं।
- अमरकोश से पहले 18 कोशों का उल्लेख मिलता है।
- इसका पहला अध्याय स्वरवर्ग कहलाता है।

## पाठांत प्रश्न

1. अमरकोश पर संक्षिप्त टिप्पणी लिखिए।
2. अमरकोश में उल्लेखित शिव के पाँच पर्यायवाची लिखिए।
3. अमरकोश में उल्लेखित विष्णु के पाँच पर्यायवाची लिखिए।

## उत्तरमाला

**10.1**

1. शब्दकोश
2. प्राण, अपान, व्यान, उदान और समन
3. स्वरण अध्ययम्, स्वर्ग, नर्क, त्रिदेव, त्रिदशालय, सुरलोक, यु, दिन
4. अमर, निरर्जरा, देवर, विबुध, सुर, आदिल, लिख, रीताभुजा, गिरवण, वृदारक, अमर्त्य
5. ब्रह्म, आत्ममु, परमेष्री, पितामह, हिरण्यमृग, कमलोभाव